❀ महाभगवते श्रीगौरचन्द्राय नमः ❀

[श्रीमद्रूपगोस्वामिविरचितः]

प्रथमावृत्तिः १०००
श्रीरामनवमी)
संवत् २०१४

प्रकाशकः
कृष्णदास,
(कुसुमसरोवर वाले)
(मथुरा)

भज--निताइ गौर राधेश्याम।
जप--हरे कृष्ण हरे राम॥

परमाराध्य, संकीर्त्तन प्रचारक, प्रेममयविग्रह, श्रीराधा-
रमणचरणदासदेव (बड़े बाबाजी) के अनुगत,
नित्यधामगत, श्रीगुरुदेव बाबाजिमहाराज
१०८ श्री बाबा (रामदासजी) के
पुनीत स्मरण में यह ग्रन्थ
समर्पित है।

❀ सूचना ❀

(क) उद्धवसन्देशस्येयं टीका श्रीमद्राधाचरणगोस्वामिन
पुस्तकालयतः प्राप्ता। तत्परिशिष्टे लिखितमिदम्—"सम्वत् १८८
मार्गशिरमासे शुक्ले पक्षे तिथौ नवम्यां चन्द्रवासरे श्रीमथुरा·
लिखितं साधुचरणेन"इति। (ख)अस्य दूतकाव्यस्यानुवादसंशोधन
''लश्रीमपुरस्थितयुवराजदत्तकालेजस्थ'' संस्कृताध्यापकमहोदयेन
प्रचुरपरिश्रमः कृतः।

२उ०५ ५ मार्च

❀ प्रस्तावना ❀

देवाचार्य्यं यं विदुः सत्कवित्वे पाराशर्य्यं तत्ववादे महान्तम् ।
शृङ्गारार्थव्यञ्जने व्याससूनुं स श्रीरूपः पातु नो भृत्यवर्गान् ।।
(बलदेवः)

उद्धवसन्देशाख्यदूतकाव्यमिदं महाभगवतः राधागोविन्दमिलितविग्रहस्य, कलिपावनावतारस्य, प्रेमप्रदानायावतीर्णस्य श्रीकृष्णचैतन्यदेवस्य पार्षदप्रवरेण, कविमुकुटमणिना श्रीमद्रूपगोस्वामिचरणमहोदयेन प्रणीतमिति गाथा रसिकहृदयक्षेत्रेषु जीवनतना नरीनर्त्ति । श्रीमद्रूपगोस्वामिपादः विक्रमाब्दस्य पञ्चदशशतके वंगदेशान्तर्गतमुर्शिदाबादखण्डे 'रामकेलि' नाम्नि ग्रामे दाक्षिणात्यब्राह्मणवंशे आविर्बभूव । अस्य महोदयस्य पूर्वजानां वंशवृक्षः क्रमत इत्थंभूतः—(१) कर्णाटभूमिपतिः श्रीसर्वज्ञः, (२) सकलयजुर्वेदस्योपदेष्टा अनिरुद्धदेवः (३) तस्यानिरुद्धस्य द्वयोर्महिष्योः सकाशात् रूपेश्वरहरिहरौ, (४) शिखरदेशराज्यनिवासिनः श्रीरूपेश्वरस्य समस्त-यजुर्वेद-उपनिषद्विद्याविलसितजिह्वः पद्मनाभ आसीत्,(५) नैहाटिनिवासिनः, गुणसमुद्रस्य,यशस्विनः पद्मनाभमहोदयस्य अष्टादश कन्याः पुरुषोत्तम-जगन्नाथ-नारायण-मुरारि-मुकुन्ददेवनामानः पञ्च पुत्राश्च आसन्, (६) सर्वकनिष्ठमुकुन्दस्य श्रीमान् कुमारदेव आसीत्, (७) वंगदेशनिवासिनः तस्य कुमारदेवस्य त्रयः पुत्रा बभूवुः । तेषु श्रीसनातनो ज्येष्ठः श्रीरूपो मध्यमः श्रीअनुपमश्च कनिष्ठ आसीत् ।

श्रीमद्रूपसनातनौ तदानीन्तनवंगदेशाधिपस्य नृपतेः हुसेनशाहस्यामात्यपदमलचक्रतुः । महाप्रभोः श्रीचैतन्यदेवस्य महानुकम्पया तत्पदं गार्हस्थ्यं च तृणवत् परित्यज्य तदादेशतो झटिति वृन्दावनं गत्वा करंगकौपीनधारिणौ वृक्षतलनिवासिनौ च भूत्वा विरेजतुः । श्रीमद्रूपगोस्वामिपादः कृष्णभक्तिरसभूषितान् बहु ग्रन्थान् समये रचयाञ्चकार । तेषु रसपरिपाटीवर्णने सिन्धुरिव "श्रीभक्तिरसामृतसिंधुः" जगन्मण्डले रसिकजनहृदयक्षेत्रान् सरसीकृत्य सर्वोपरि वरीवर्त्ति । भगवद् राधागोविन्दयोरप्राकृतशृङ्गाररसवर्णने "उज्ज्वलनीलमणि" रेव अद्वितीय-

महोच्चतमो ग्रन्थराजः साहित्यभण्डारेऽपि वरीवर्त्ति। अपरे तु व्रजलीलाविषयवर्णनापरकं 'विदग्धमाधवनाटकम्' द्वारकालीलाविषयकवर्णनपरं 'ललितमाधवनाटकञ्च' जगद्विख्याते। पुनश्च ग्रन्थकारेण "दानकेलिकौमुदी" नाम्नी राधागोविन्दयोः दानलीलाविस्तारवर्णनकारिणी भाणिकाऽपि व्यरचि। भरतमुनिनिर्म्मितं "नाट्यशास्त्रं" रससुधाकरादिकं च दृष्ट्वा श्रीरूपपादेन "नाटकचन्द्रिका" नाम्नी नाट्यलक्षणमयी अपूर्व्वा पुस्तिका विरचिता। तन्निर्म्मिता "स्तवमाला" पि राधागोविन्दयोः स्तवादिवर्णने अत्यद्भुता भवति। भगवद्स्वरूपतत्वनिर्णये परमदक्षतरं ग्रन्थरत्नं 'लघुभागवतामृतं' कोऽपि न जानाति? श्रीराधागणोद्देशदीपिकाऽपि सगण-श्रीराधागोविन्दयोः सेवापरिपाटी-व्यवहार्य्यद्रव्य-स्थानादीनां वंशावल्यादीनां च परिचये महती प्रसिद्धा।

मथुरामण्डलान्तर्गत—वनोपवनादीनां संक्षेपतः वर्णनपरकं "मथुरामाहात्म्य" मपि सर्वोत्तमं भवति। "श्रीकृष्णजन्मतिथिविधि" रपि जन्माभिषेकादौ परमावश्यकः स्यात्। तद्विरचिता "प्रयुक्ताख्यचन्द्रिका"पि व्याकरणशास्त्रसम्बन्धी संक्षिप्तग्रन्थो दृश्यते। तन्निर्म्मितं "हंसदूताख्यं" दूतकाव्यं सहृदयरसिकहृदयेषु महत्कौतूहलं चमत्कारदिव्यविप्रयोगरसपोषणं च निर्वाधं ददाति अस्मिन् न सन्देहता। उद्धवसन्देशाख्यनामा प्रस्तुतप्रबन्धोऽयमपि न केषुचित् आश्चर्य्यसारवत्तां विरहरसवैचित्रीं च दधाति?

अस्मिन् उद्धवसन्देशाख्ये दूतकाव्ये नायकचूडामणिना श्रीकृष्णेन मथुरातः द्वारकातः वा उद्धवद्वारा विरहविधुराणां गोपाङ्गनानां सर्वेषां व्रजवासिनां वा सान्त्वनाय दौत्यं प्रेष्यते। श्रीमद्भागवते "गच्छोद्धव! व्रजं सौम्य! पित्रो नः प्रीतिमावह। गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय", सान्त्वयामास 'सप्रेमैरायास्य इति दौत्यकैः' इत्यादि श्लोकानवलम्ब्य अत्र ग्रन्थकारस्य रसिकजनहृदयपरिपोषिणी महती चेष्टा संदृश्यते। तत्र केन रूपेण किं सन्देशं नीत्वा केन मार्गेण मया मथुरातः वृन्दावनं गन्तव्यं कुत्र वा केन रूपेणावस्थेयं किं कर्त्तव्यं

का वा दशा वर्णनीया इत्यादिकं उद्धवं प्रति स्पष्टतः वर्णनं नास्ति । अतः तान् स्पष्टयितुं श्रीरूपगोस्वामिपादैरिदं उद्धवसन्देशाख्यं दूतकाव्यं व्यरचि । अत्र श्रीकृष्णेन स्वयं उद्धवाय गमनमार्गं वर्ण्यते । तद्यथा—प्राक् गोकर्णाख्यशिवस्थलं (१) तदनु–यमुनासरस्वतीसङ्गमः, (२) ततः कालीयह्रदपरिसरं, (३) तस्माद्‌ब्रह्मह्रदः, (४) ततः यज्ञस्थलं, तदनु–कोटिकाख्यस्थलं (६) ततः सट्टीकराख्यगरुडगोविन्दस्थलं, (७) तदनन्तरं बहुलावनं (८) ततः गोकुलं, (९) शाल्मलवनं च, (१०) तदनु–साहाराख्यं, (११) ततः रहेलाख्यं, (१२) ततः सौयाग्निकस्थलं, (१३) तदनु-गोष्ठाङ्गनवर्णनं, (१४) तदनन्तरं पूरप्रवेशनमित्यादिकम् ।

अस्मिन् देशे बहूनि दूतकाव्यानि दृश्यन्ते श्रूयन्ते च । तानि काकदूत-पादपदूत-मनोदूत-पवनदूत-उद्धवदूत-कोकिलसन्देश - चकोरसन्देश-मेघसन्देश-हंससंदेश-कोकसन्देशादीनि । तेषु विष्णुदासेन विरचितं मनोदूत,धोयीकविना विरचितं पवनदूतं,वादिचन्द्रेण विरचितं पवनदूतकाव्यं, माधवकवीन्द्रविरचितं उद्धवदूतं, वेदान्ताचार्यकृतः हंससन्देशः विष्णुत्राताविरचितः काकसन्देशः एतानि दूतकाव्यानि प्रसिद्धानि ।

गौड़ीयग्रन्थरत्नकोषागारेऽपि श्रीमद्रूपचरणैर्विरचिते हंसदूत उद्धवसन्देशाख्ये इमे द्वौ दूतकाव्ये एवं श्रीकृष्णदेवसार्वभौमेन विरचितं 'पदाङ्कदूतं' श्रीनन्दकिशोरगोस्वामिना विरचितं 'शुकदूताख्यं' विशालदूतकाव्यं च समष्टितः चत्वारि दूतकाव्यानि विराजन्ते । इमानि सर्वाणि श्रीकृष्णरसपोषकाणि भवन्ति । एषु प्राकृतरसस्यावकाशो नास्ति ।

यद्यपि कविश्रेष्ठेन कालिदासेन विरचितं प्राकृतरसवैभववर्णनपरकं 'मेघदूताख्यं' दूतकाव्यं प्राचीनतया लोकोत्तरचमत्कारकतया च रसिकैः प्रशंसित तदपि 'प्राकृते ये रसं मन्यन्ते ते भ्रान्ता एव तत्र विभावादीनां वैरूप्यात्', "साधुकाव्यनिषेधणात्", 'न यद्वचश्चित्रपदं हरे र्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा

निरमन्त्यु शिक्षया', 'तद्वाङ्विसर्गो जनताघविप्लवो यस्मिन् प्रतिश्लोक-मवद्धवत्यपि। नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः", श्रीरुक्मिणीदेवीवाक्येऽपि-त्वक् श्मश्रु रोमनख-केशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट् कफपित्तवातम्। जीवच्छवं भजति कान्तमतिविमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्रीति' नाना प्रमाण-वलात् तत्र प्राकृते रसं निषिध्य पुनः"रसो वै सः""रसो ह्येवायं लब्ध्वा-नन्दी भवति" "सैषानन्दस्य मीमांसा भवती"त्यारभ्य मानुषानन्दतः प्राजापत्यानन्दपर्य्यन्तं दशकृत्वा शतगुणिततया क्रमेण तेषामानन्दोत्कर्ष-परिमाणं प्रदर्श्य पुनश्च ततोऽपि शतगुणत्वेन परब्रह्मानन्दं प्रदर्श्याप्य-परितोषात् यतो वाचो निवर्त्तन्ते इत्यादिश्लोकेन तदानन्दस्यानन्त्यमेव स्थापितम्", 'नित्यरसः', 'सर्वरसः', 'अखण्डरसबोधः','सर्वरसकदम्बः', 'अखिलरसामृतमूर्त्तिः' इत्यादिनानावचनबलेन अप्राकृते भगवद्वस्तुनि एव रसत्वमन्यत्र रसाभासत्वं निश्चितम्। अतः अस्य उद्धवसन्देश-हंसदूताख्यदूतकाव्यद्वयस्य निर्माणेन रसिकान् महाविप्रलम्भमय्यानन्द-स्वरूपेण रसेन नित्यभगवद्रसे निमज्जयितुं ग्रन्थकारस्य महान् प्रयत्नः। तस्मात् प्राकृतनायकादिवर्णनपरात् मेघदूतात् अनयोः हंसदूतोद्धव-सन्देशयोः महद्वैशिष्ट्यम्। रसस्य 'ब्रह्मास्वादसहोदर' गर्भात् तत्तु मोक्षे पर्य्यवसानात् तस्मादनन्तगुणिते आनन्दस्वरूपे भगवद्वस्तुनि एव रसचरमत्वं न तु मेघदूतादिवर्णिततुच्छनायक-नायिकाद्यनुभ-वस्मरणकीर्त्तनादेः, प्रत्युत तत्तु पापावहत्वमेव। न तु प्राकृतनायक-नायिकाविषयमवलम्ब्य केषाञ्चित् मोक्षं स्यात्। जीवस्याणुरूपतया तमालम्ब्यानन्दास्याणुरूपेण पर्य्यवसानात्, आनन्दसागरस्य भगवतः आश्रयात् तस्य अखण्डरसास्वादनमवश्यमेव स्वीकार्य्यम्। अस्तु अस्मिन् दूतकाव्ये व्रजवासिनां विप्रलम्भमयचरममहारसवैभवविलासं दर्शयित्वा श्रीरूपपादः काव्यास्वादनचतुरान् सहृदयरसिकान् किञ्चित् किञ्चित् परिवेषयित्वा आस्वादयामास। यं प्राप्य सर्वे कृतार्था अभवन् इति अलमतिविस्तरेण।

कृष्णदास.

❀ श्रीउद्धवसन्देशः ❀

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां बितानै-
र्लक्ष्मीवत्तां दधति मथुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीड़ाभवनवड़भीमूर्ध्नि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीम् ॥१॥

टीका—एकस्मिन् दिवसे मथुरां गतः श्रीकृष्णः सर्व्वोर्द्ध्वमट्टालिकामारूढः सन् नानाविधोपवनैः शोभितां मधुपुरीं तत्रस्थ-नानाविधजनानपि ददर्श। तद्दर्शनेन व्रजस्य एवं स्वविच्छेददावानलेन दग्धानां व्रजस्थनानाविधभक्तानां जातं यत्स्मरणं तेन व्याकुलो वभूवेत्याह सान्द्रीतिद्वाभ्याम्-क्रीडाभवनस्य आटालीतिप्रसिद्धायाः सर्व्वोर्द्ध्ववर्त्ति वडभ्या मूर्ध्नि विद्योतमानः श्रीकृष्णः मथुरानगरे दत्तनेत्रः सन् सद्यस्तत्क्षण एव गोकुलारण्यसम्बन्धिमैत्रीं दध्यौ ध्यानं चकार । मथुरापत्तने कीदृशे पुष्पितानां विटपिनां वृक्षाणां सान्द्रीभूतैर्वितानैश्चन्द्रातपैः करणैः शोभावत्तां दधति ॥१॥

अनु—एक दिवस मथुरानाथ श्रीकृष्ण ने अपने केलिगृह की सर्व्वोच्च अट्टालिका पर आरोहण करके नाना प्रकार उपवनों से शोभित मथुरानगरी एवं तत्रस्थ नाना प्रकार मनुष्यों को देखा। उससे अपने विरहदावानल द्वारा दग्ध व्रजवासि नानाविध भक्तों का स्मरण हुआ तथा वे व्याकुल हो गये। उस समय आपने अपने अन्तरंग सहचर श्रीमान् उद्धवजी को दूत बनाकर व्रज के लिये भेजने का निश्चय किया। आपने उद्धव जी को निकट में बैठाकर व्रजवासियों को सान्त्वना देने के लिये जो कोमल सरस

उपदेश किया था वह उद्धवसन्देश करके कहा जाता है। भगवान् गौराङ्गदेव के परिकर वर, श्रीव्रजविपिनचर, रसिककविवर, ग्रन्थकार श्रीरूपगोस्वामीजी अब एकशत एकत्रीश श्लोक द्वारा उसका वर्णन करते हैं यथा-विकसित नवीन वृक्षों के वन विस्तार से परम शोभा को धारण करने वाली मथुरानगरी में दक्षनेत्र श्रीकृष्ण केलिगृह की ऊपर अट्टालिका में विराजमान होकर चञ्चल हृदय से वृन्दाबन के सौहृद का चिन्तन करने लगे ॥१॥

००००

श्वासोल्लासैरथ तरलितः स्थूलनालिकमालः
पूर्णां कुर्व्वन्नयनपयसां चक्रवालैः प्रणालीः।
स्मारं स्मारं प्रणयनिबिडां बल्लवीकेलिलक्ष्मीं
दीर्घोत्कण्ठाजडिमहृदयस्तत्र चित्रायितोऽभूत् ॥२॥

टीका—तेषां विच्छेदजन्यश्वासातिशयैस्तरलिता स्थूलकमलस्य माला यस्य स, नयनपयसां चक्रवालैः समूहैः प्रनाला इति प्रसिद्धाः प्रणालीः पूर्णाः कुर्व्वन्, तत्र वडभीमूर्ध्नि ॥२॥

अनु०—उन व्रजजनों के विरह जनित अत्यन्त दीर्घनिःश्वासों के उल्लासों से उनके गले की स्थूल कमलमाला चञ्चलायमान हो गई तथा नयन जल के प्रवाहों से मार्ग की नालियाँ (जल निकलने का मार्ग) पूर्ण हो कर बहने लगीं। आप प्रणय से निविड व्रजगोपियों की विहारशोभा का बार बार चिन्तवन करने लगे। दीर्घ-उत्कण्ठा से उनके हृदय निस्तब्ध हो गया तथा उस समय आप चित्र की भाँति हो गये ॥२॥

००००

अन्तःस्वान्ते क्षणमथ परामृष्य पाराभिलाषी
कष्टाम्भोधे र्भवनशिखरे कुट्टिमान्तर्निविष्टः।

सोत्कण्ठोऽभूदभिमतकथां शंसितुं कंसभेदी
नेदिष्ठाय प्रणयलहरीबद्धवागुद्धवाय ॥३॥

टीका—कंसभेदी श्रीकृष्णः वृन्दारण्यस्मरणजनितव्याकुलचित्तोऽपि धैर्य्यमवलम्ब्य तस्य भवनस्य मूर्ध्नि चवुतरा इति प्रसिद्धस्य कुट्टिमस्य मध्ये निविष्टः सन् अन्तः स्वान्ते स्वान्तमध्ये क्षणं परामृश्य नेदिष्ठाय अन्तिकतमाय अर्थान्निकटवर्त्तिने उद्धवाय अभिमतकथां शंसितुं सोत्कण्ठोऽभूत्। कथं भूतः कष्टसमुद्रस्य पाराभिलाषी ॥३॥

अनु०—कंसनाशन आप अन्तर्मना से क्षणकाल परामर्श करके उस दुःख-समुद्र का पार होनेके इच्छुक होकर भवनके शिखर में कुट्टिम अर्थात् मणिजटित चवुतरा पर बैठ गये तथा वे निकट में उपस्थित उद्धव जी से निज हृदय की बातें कहने के लिये उत्कण्ठित हुए। उनकी बाणी प्रणयलहरियों से रुद्ध होकर गद्गद हो गई ॥३॥

◇◇◇◇

त्वं सर्वेषां मम गुणनिधे ! बान्धवानां प्रधानं
त्वद्वो मन्त्रैः श्रियमविचलां यादवाः साधयन्ति ।
इत्याश्वासादभिमतविधौ कामये त्वां नियोक्तुं
न्यस्तः साधीयसि सफलतामर्थभारः विधत्ते ॥४॥

टीका—हि यस्मात् साधियसि अतिशयसाधुजने न्यस्तोऽर्थभारः सफलतां धत्ते ॥४॥

अनु०—आप उद्धवजी को कहने लगे, हे गुणों के सागर ! तुम मेरे समस्तबन्धुओं में प्रधान हो । तुम्हारे परामर्शों से यादवगण अचल-लक्ष्मी को प्राप्त करते हैं। इस विश्वास के कारण मैं अपने अभिमत की सिद्धि के लिए तुमको नियुक्त करने की इच्छा करता हूँ ।

क्योंकि अतिशय साधुजनों को सौंपा गया कार्य्यभार अवश्य सफल होता है ॥४॥

◇◇◇◇

संरम्भेण क्षितिपतिगिरां लम्भिते गर्वितानां
वृन्दारण्यान्मयि मधुपुरीं गान्दिनीनन्दनेन ।
बल्लव्यस्ता विरहदहनज्वालिकामण्डलीनां
अन्तर्लीनाः कथमपि सखे ! जीवितं धारयन्ति ॥५॥

टीका—गर्व्वितानां कंसगिरां संरम्भेण अत्यावेशेन हेतुना वृन्दारण्यात् सकाशात् मधुपुरीं अक्रूरेण लम्भिते प्राप्ते सति ताः कथमपि कष्टेन जीवितं धारयन्ति ॥५॥

अनु०—गान्दिनीनन्दन अक्रूर के द्वारा कंस के गर्व्वपूर्ण आदेश से मेरा वृन्दावन से मथुरा गमन होने पर वे सब व्रजसुन्दरियाँ बिरहाग्नि की ज्वालाओं में लीन होकर किसी प्रकार जीवन धारण कर रही हैं ॥५॥

◇◇◇◇

प्राणेभ्यो मे प्रणयवसतिर्मित्र ! तत्रापि राधा
धातुः सृष्टौ मधुरिमधराधारणादद्वितीया ।
वाचो युक्तिस्तवकितपदैरद्य सेयं सखीनां
गाढाश्वासैर्विधुरविधुरं प्राणभारं बिभर्त्ति ॥६॥

टीका—वल्लवीषु मध्ये प्राणेभ्योऽपि प्रणयवसतिः श्रीराधा विधातुः सृष्टौ माधुर्य्यातिशयधारणादद्वितीया, सा सखीनां गाढाश्वासैः करणैर्विधुर-विधुरं क्लिष्टादपि क्लिष्टं प्राणभारं बिभर्त्ति। वाचो युक्त्या स्तवकित विशिष्टपदं अक्षरं यत्र तथाभूतैः । अत्र वाचो युक्तिरित्यखण्डपदं युक्तिमात्रबोधकम् । यथा तद्वसवक्तव्ये तत्परवश इत्युच्यते ॥६॥

अनु०—हे मित्र ! वहाँ मेरे प्राणों की प्रियतमा तथा माधुर्य्यपरीत को धारण करने से ब्रह्मा की सृष्टि में अद्वितीया और उन ब्रजबालाओं में श्रेष्ठ श्रीराधिका विद्यमान है। अभी भी जो सखियों के युक्तिपूर्ण बचनों वाले गाढ़ आश्वासनों से बड़ी कठिनाई से प्राणों को भार समझ कर धारण कर रही है ॥६॥

००००

गत्वा नन्दीश्वरशिखरिणो मेखलां रत्नभूतां
त्वं वल्लीभिर्वलयितनगां बल्लवाधीशपल्लीम् ।
तां दष्टाङ्गीं बिरहफणिना प्राणयन् प्रीणयार्त्तां
वार्त्तामन्द्रध्वनिभिरथ मे मन्त्रिचूडामणीन्द्र ! ॥७॥

टीका—त्वं बल्लवाधीशस्य नन्दस्य पल्लीं नगरं गत्वा विरहसर्पेण दष्टाङ्गीं स्तां आर्त्तां गोपीः, मद्वार्त्तारूपमन्त्रध्वनिपाठैः प्राणयन् जीवयन् सुखय। पल्लीं कथम्भूतां नन्दीश्वरपर्व्वतस्य या मेखला नितम्बस्तस्य रत्नभूताम् ॥७॥

अनु०—हे श्रेष्ठमन्त्रिशिरोमणि ! तुम नन्दीश्वर पर्वत की रत्नमय मेखलारूप, लतापरिवेष्टित वृक्षों से युक्त, गोपराज श्रीनन्दमहाराज की नगरी में जाकर विरह सर्प से दंशित तथा परमव्याकुला उस राधा को मेरी वार्त्ता रूप गम्भीरध्वनि से जीवित करते हुए आल्हादित करो ॥७॥

००००

तिष्ठन्त्येते जगति बहवस्त्वद्विधानां विधातुं
चेतः पूर्त्तिं ननु जनपदाः मूर्त्तिभिर्मे सनाथाः ।
भूयो भूयः प्रियसख ! शपे तुभ्यमव्याजतोऽहं
भूरन्या मे हृदि सुखकरी गोष्ठतः कापि नास्ति ॥८॥

टीका—त्वद्विधानां चेतः पूर्त्तिं विधातुं कत्तुं मम मूर्त्या श्रीविग्रहेण सनाथाः बहवो जनपदाः देशास्तिष्ठन्ति ॥८॥
अनु०—हे प्रियसखे ! तुम्हारे सदृश बन्धुओं का चित्त प्रसन्न करने के लिए मेरी मूर्त्तियों से सनाथ अर्थात् मेरे स्वरूपों से युक्त बहुत देश विद्यमान है, परन्त मैं निष्कपट भाव से बार २ तुम्हारी शपथ खा कर कह रहा हूँ कि ब्रज के अतिरिक्त हृदय सुखकारी भूमि कोई नहीं है ॥८॥

◇◇◇◇

मद्विश्लेष-ज्वलनपटली-ज्वालया जर्जराङ्गाः
सर्वे तस्मिन्निधनपदवीं शाखिनोऽप्याश्रयिष्यन् ।
गोपीनेत्रावलिविगलितै भूरिभिर्बाष्पधारां
पूरैस्तेषां यदि निरवधिर्नाभिषेकोऽभविष्यत् ॥६॥

टीका—तस्मिन् गोकुले सर्वे शाखिनो वृक्षाः मद्विच्छेदेन निधनपदवीं नाशावस्थां आश्रयिष्यन् यदि गोपीनां नयनजलप्रवाहैस्तेषां वृक्षाणां अभिषेको नाभविष्यत् ॥६॥
अनु०—हे सखे ! मैं अधिक क्या कह सकता हूँ । सुनो, मेरी बियोगाग्नि की ज्वालाओं से जर्जरांग होकर वहाँ के वृक्ष सब निधन पदवी को प्राप्त हो जाते अर्थात् पूर्णतः सूख गए होते, यदि गोपियों के नेत्रों से बिगलित प्रचुर अश्रु जल की धाराएँ निरन्तर उनको संसिक्त न रखती । भावार्थ-यदि गोपियों के नयनों की जल-धाराएँ उन वृक्षों को नहीं भीजाती तब वे सब अब तक सूख-मर जाते ।६॥

◇◇◇◇

आत्मक्लेशैरपि नहि तथा मेरुतुल्यैर्व्यथन्ते
बल्लव्यस्ताः प्रियसख ! यथा मद्व्यथालेशतोऽपि ।

दुर्वारां मे विरहविहितां निह्नुवानस्तदार्त्ति
प्रेमग्रन्थिं त्वमतिपृथुलं तासु विख्यापयेथाः ॥१०॥

टीका——ता वल्लव्यः मेरुवत्तुङ्गैरुच्चैरात्मक्लेशैः करणैस्तथा न व्यथन्ते यथा मद्व्यथालेशतोऽपि । तासां वल्लवीनां आर्त्तिं निन्हुवानः दूरीकुर्वन् त्वं तासु मम प्रेमग्रन्थिं विज्ञापयेथाः ॥१०॥

अनु०——हे प्रियसखे ! वे ब्रजगोपियाँ लेशमात्र मेरी व्यथा से जिस प्रकार व्यथित हृदय हो जाती हैं, सुमेरु के बराबर निज क्लेशों से उस प्रकार व्यथित नहीं होतीं। अर्थात् गोपियाँ सुमेरु के बराबर अपने दुःख को लेश मात्र नहीं गिनती हैं, परन्तु मेरे लेश मात्र दुःख को देख कर अपने हृदय में सुमेरु के बराबर क्लेश का अनुभव करती हैं। अतएव मेरी इस विरह जन्य महान् आर्ति को छिपाते हुए तुम अत्यन्त मोटी प्रेमग्रंथि को उन्हें अवगत कराना, अर्थात् अति सावधानी से उन्हें खबर कराना॥१०॥

००००

भ्रातर्नन्दीश्वरगिरिमितो यास्यतस्ते विदूरं
पन्था श्रीमानयमकुटिलः कथ्यते पथ्यरूपः ।
प्रीये सद्यस्त्वयि निपतिते गोकुलानन्दसिन्धौ
सन्तस्तुष्टे सुहृदि हि निजां तुष्टिमेवामनन्ति ॥११॥

टीका——विदूरं यास्यतस्तव अयं श्रीमान् अकुटिलः पन्था कथ्यते । गोकुलस्थसर्वपदार्थदर्शनजन्यानन्दसिन्धौ त्वयि निपतिते सति अहं प्रीये प्रीतियुक्तो भवामि । यतः सुहृदि तुष्टे सति सन्तो जनाः निजां तुष्टिमेवामनन्ति जानन्ति ॥११॥

अनु०——हे भैया ! यहाँ से अतिदूरस्थित नन्दीश्वर पर्वत को जाने के लिये सरल सुखकर मार्ग बताता हूँ। तुम उसी मार्ग में जाना

नहीं तो तुम्हारा जाने में दूर तथा बिलम्ब होगा। जिस समय तुम गोकुलानन्द-समुद्र में प्राप्त होगे अर्थात् आनन्द समुद्र स्वरूप ब्रज में पँहुच कर वहाँ समस्त पदार्थों के दर्शनानन्द में डूब जाओगे उसी समय हम भी यहाँ प्रसन्नता का अनुभव करेंगे, क्यों कि सन्तगण निज सुहृद् के सन्तुष्ट होने पर स्वयं भी प्रसन्न होते हैं ॥११॥

००००

अग्रे गौरीपतिमनुसरेः पत्तनान्त र्वसन्तं
गोकर्णाख्यं व्यसनजलधौ कर्णधारं नराणाम् ।
यस्याभ्यर्णे सह रविजया सङ्गमो जङ्गमानां
आविष्कुर्वन्नभिमतधुरां धीर ! सारस्वतोऽस्ति ॥१२॥

टीका—मथुरापत्तनस्यान्तर्वसन्तं गोकर्णाख्यं महादेवं त्वं अनुसरेः, यस्याभ्यर्णे निकटे रविजया यमुनया सह सारस्वत: सङ्गमः सरस्वतीसम्बन्धासङ्गमोऽस्ति। किं कुर्वन् तस्मिन् स्नानादिकुर्वतां जङ्गमानां मनुष्यादीनामभिमतस्य वाञ्छायाः धुरां भारं आविष्कुर्वन्, धुरशब्दात् अत् समासान्तस्तदुत्तरं टाप् ॥१२॥

अनु०—हे धीर ! पहले तुम नगर के मध्य में विराजमान, मनुष्यों के दुःख समुद्र के नाविक, गोकर्ण नामक गौरीपति महादेव का अनुसरण करना। जिनके निकट प्राणियों की अत्यधिक मनोभिलाषाओं को पूर्ण करने वाला, जमुना के साथ सरस्वती का संगम विद्यमान है ॥१२॥

००००

आरूढस्ते नयनपदवीं तन्वि ! धन्यासि सोऽयं
गोपी-नम्रीकरणमुरलीकाकलीकः कलावान् ।

इत्यालापस्फुरितवदनै र्यत्र नारीकदम्बैः
दृग्भङ्गीभिः प्रथममथुरासङ्गमे चुम्बितोऽस्मि ॥१३॥

टीका—हे तन्वि ! सोऽयं कलावान् श्रीकृष्णस्तव नयनपदवीमारूढः । अतस्त्वं धन्यासीत्यालापेन स्फुरितवदनैर्नारीसमूहैर्दृग्भङ्गीभिः करणैः नन्दीश्वरादागतस्य मम मथुरया सह प्रथमसङ्गमे अहं चुम्बितोऽस्मि साभिलाषमीक्षितोऽस्मि, यत्र यमुनासरस्वतीसङ्गमे ॥१३॥

अनु०—"हे कृशांगि ! गोपियों को विवसन करने वाली श्रीमुरली का मधुरशब्द करने वाले तथा चौषठ विद्याओं में प्रवीण वे श्रीकृष्ण तुम्हारे दृष्टिपथ में आ रहे हैं अतः तुम परम पुण्यवती हो" इस प्रकार के वार्त्तालाप से प्रसन्न मुख वाली नारीजनों के द्वारा उनके दृष्टि विभ्रम से मैं मथुरा में प्रथम प्रवेश करते समय वहाँ यमुनासरस्वती संगम स्थान में अभिनन्दित हुआ था ॥१३॥

◇◇◇◇

तस्मादन्तर्विरचितपरानन्दपूराददूरां
याहि प्रीत्या सपदि पदवीमम्बिकाकाननस्य ।
यत्रानन्दोत्सवमकरवं सर्पतः सर्पतोयात्
नन्दं विद्याधरमपि पुरा मोचयन् बल्लवीनाम् ॥१४॥

टीका—तस्मात् स्थलात् अदूरां अम्बिकावनस्य पदवीं याहि, यत्र अम्बिकावने पुरा तातं श्रीनन्दं सर्पतः सकाशात् मोचयन् एवं विद्याधरं गन्धर्वं सर्पतायाः सकाशात् मोचयन् गोपीनामानन्दोत्करमहमकरवम् ॥१४॥

अनु०—शीघ्र ही तुम प्रसन्नता के साथ उस परमानन्दपूर्ण प्रदेश के समीप अम्बिकावन के मार्ग को जाना । जहाँ पर पहले मैंने कालियह्रद से आए हुए सुदर्शन विद्याधर को सर्प योनि से तथा

सर्परूप उसके मुख से पिता नन्द को छुड़ाकर गोपियों को आनन्दित किया था ॥१४॥

००००

भूयोभिस्त्वं किल कुवलयापीड़दन्तावघातैः
एतां निम्नोन्नतपरिसरां स्यन्दने वर्त्तमानः ।
मुञ्चोत्तुङ्गां मिहिरदुहितु धीर ! तीरान्तभूमिं
मन्दाक्रान्तां न खलु पदवीं साधवः शीलयन्ति ॥१५॥

टीका—हे धीर ! रथे वर्त्तमानस्त्वं उत्तुङ्गां यमुनातीरान्तभूमिं मुञ्च, यतस्तां भूमिं कुवलयापीड़दन्तावघातैर्निम्नोन्नतपरिसरां, यतः साधवो जनाः मन्दया दोषेणाक्रान्तां पदवीं न शीलयन्ति ॥१५॥

अनु०—हे धीर ! रथ में बैठे हुए तुम कुवलयापीड नामक हाथी के दांतों के आघात से ऊँची-नीची यमुना की तीरभूमि को छोड़ देना । क्यों कि साधुजन मन्दजनों से आक्रान्त मार्ग का परित्याग कर देते हैं ॥१५॥

००००

मुञ्चासव्ये विहगरुचिरं किञ्चिदस्मादुदञ्चं
राजत्तीरं नवसुमनसां राजिभिस्तीर्थराजम् ।
यत्रापूर्वं किमपि कलयाञ्चक्रतुर्मत्प्रभावाद्
आभीराणां कुलमपि तथा गान्दिनीनन्दनोऽपि ॥१६॥

टीका—असव्ये दक्षिणे अस्मात् स्थलात् उदञ्चं उत्तरदिग्वर्त्तिनं अक्रूरघाट इति प्रसिद्धं तीर्थराजं मुञ्च, यत्र तीर्थराजे वरुणलोके मदैश्वर्यं दृष्ट्वा मोक्षाभिलाषवतामाभीराणां कुलं एवं गान्दिनीनन्दनोऽपि मथुरागमनसमये मत्प्रभावात् किमपि कलयाञ्चक्रतुः ॥१६॥

अनु०—अम्बिकावन के दाहिनी ओर के कुञ्ज उत्तर भाग में अनेक पक्षियों के कूजन से मनोहर नवीन कुसुमों के समूह से शोभायमान तट वाले तीर्थराज (अक्रूरघाट) को देख कर तुम आगे बढ़ जाना। मथुरागमन समय वहाँ पर मेरे प्रभाव से वरुणलोक से मेरा ऐश्वर्य्य देखकर मोक्षाभिलाषी गोपसमाज तथा अक्रूरजी ने अपूर्व्व वैभव का अवलोकन किया था ॥१६॥

००००

यज्वानस्ते यदपि भवतो विप्रिया हेलनान्मे
नम्रस्तेषां तदपि भवनद्वाररथ्यां जिहीथाः ।
गायन्तीनां मदनुचरितं तत्र विप्राङ्गनाना-
मालोकाय स्पृहयसि न चेदीक्षणैर्वञ्चितोऽसि ॥१७॥

टीका—यज्वानो याज्ञिकब्राह्मणाः यद्यपि मम हेलनात् भवतोऽप्रियास्तथापि नम्रः सन् तेषां सदनस्य द्वारवीथ्यां मच्चरितं गायन्तीनां ब्राह्मणीनामालोकाय जिहीथाः गच्छेः, चेद्यदि तासामालोकनं न स्पृहयसि तदा त्वमक्ष्णां भावे र्जितोऽसि अक्षी भवसीत्यर्थः ॥१७॥

अनु०—यद्यपि वहाँ वे यज्ञपरायण ब्राह्मणगण मेरी अवहेलना करने से तुम्हें प्रियकर नहीं होंगे तो भी तुम नम्र होकर उनके गृह द्वार के मार्ग में निकलना। यदि वहाँ तुम मेरे चरित्रों को गाने वाली विप्रांगनाओं को देखने के लिए इच्छुक नहीं होगे तो नैनों से वञ्चित रहोगे। अर्थात् उनके दर्शन से ही तुम्हारे नैत्र सफल होंगे ॥१७॥

००००

तद्धिरुत्पातं स्फुटदविटपिनां मण्डलेनाभिपूर्णं
तूर्णं गच्छेरुपपुरि पुरः कोटिकाख्यं प्रदेशम् ।

यत्र प्राप्ते मयि विकिरती नेत्रमुद्यानपाली
शालीनापि प्रकटितभुजामूलमल्पं जहास ॥१८॥

टीका—पुर्याः समीपमुपपुरोऽग्रे कोटराख्यं प्रदेशं त्वं गच्छेः, मालाकारस्त्री उद्यानपाली शालीना शुद्धस्वभावाऽपि मयि नेत्रं विकिरती सती प्रकटितभुजामूलं यथा स्यात्तथा अल्पं जहास ॥१८॥

अनु०—मथुरानगरी के समीप विकसितवृक्षों के समूह से युक्त उस प्रसिद्ध कोटिक (उत्तरकोटि) नामक स्थान को तुम शीघ्र ही जाना। जहाँ मेरे पहलीबार पहुँचने पर, लज्जावती होते हुए भी शुद्धस्वभावा उद्यान पालिका ने अपनी प्रणयस्निग्ध दृष्टि मुझे अर्पित की थी तथा अपने बाहुमूल को उठाकर कुछ मुस्कराई थी ॥१८॥

◇◇◇◇

इत्थं क्रान्त्वा पुरपरिसरान् याहि सट्टीकराख्यं
पट्टीभूतं भ्रमरनृपतेः पुष्पितारण्यमारात् ।
श्रीदामानं सुभग ! गरुडीकृत्य यत्राधिरूढः
क्रीडाकारी दधदुरुभुजान् द्वादशाहं वसामि ॥१९॥

टीका—भ्रमरराजस्य पट्टीभूतं सिंहासनस्वरूपं, हे सुभग ! द्वादशभुजान् दधत् सन् चर्षं तत्रैव वसामि ॥१९॥

अनु—इस प्रकार नगर के आस पास के भागों को पार करके समीप में भ्रमरराजा के द्वारा अधिकृत अथवा भ्रमरराजा के सिंहासन स्वरूप तथा पुष्पितकानन वाले सट्टीकर नामक (छट्टीकरा नाम वाले) स्थान को जाना। हे मित्र ! वहाँ आजानुबिलम्बित भुजाओं वाले मैंने क्रीडासक्त होकर श्रीदामा को गरुड बनाया तथा बारह दिनों तक उसके कन्धे पर वास किया ॥१९॥

◇◇◇◇

मुग्धे ! श्यामः कलयति युवा पश्य मामेव न त्वां
इत्युल्लासैरहमहमिकां सर्वतः कुर्वतीभिः ।
यानालम्बो सरलनयनालोकमैत्रीभराणां
ग्रामीणाभियु र्वतिभिरहं यत्र पात्रीकृतोऽस्मि ॥२०॥

टीका—हे मुग्धे ! श्यामो युवा मामेव कलयति पश्यति न त्वामित्यह-महमिकां कुर्वतीभि ग्रामस्थाभियु र्वतीभिः सरलनयनावलोकनेन या मैत्री तस्या भराणां अतिशयतां अहं पात्रीकृतोऽस्मि । यानालम्बी रथालम्बी ॥२०॥

अनु०—यही वह स्थान है जहाँ रथ में बैठा हुआ मैं उन ग्रामयुवतियों के मैत्रीपूर्ण सरलनयनों के अवलोकन का विषय बना था। जो यह कहती हुई कि "हे मुग्धे ! देख, यह युवा श्याम मुझे ही देख रहा है, तुझे कभी नहीं" उल्लास पूर्ण स्पर्द्धा से प्रगल्भ हो रही थीं ॥२०॥

◇◇◇◇

मुञ्चन् सव्ये बहुलबहुला-काननस्योपशल्यं
तञ्चोत्तुङ्गं ह्रदपरिसरं दक्षिणे कालियस्य ।
फुल्लाभिस्त्वं पिहितमिहिरोद्योतमन्तर्लताभिः
धीराध्वानं विमलसरसीराजिभाजं भजेथाः ॥२१॥

टीका—सव्ये वामे बहलं निविडं यत् बहुला—काननं तस्य उपशल्यं समीपं मुञ्चन् एवं कालीयह्रदस्य उत्तुङ्गं अत्युच्चं परिसरं मुंचन् प्रकृताध्वानं भजेथाः । कीदृशं अन्तर्लताभिः पिहितमिहिरद्योतं आच्छादित-सूर्यातपं, पुनः कीदृशं विमलसरस्याः श्रेणी यत्र तथाभूतम् ॥२१॥

अनु०—हे धीर ! तुम वन के बाईं ओर अनेक ग्रामों की सीमाओं को तथा दाहिनी ओर कालियह्रद के उच्च प्रदेश को छोड़ते हुए

उस मार्ग को ग्रहण करना जिसमें विकसित लताओं के द्वारा सूर्य्य का प्रकाश ढका हुआ है तथा जो निर्मल सरोवरों के समूह से शोभित है ॥२१॥

००००

वल्लीचित्रं व्रज मृगहरं तं ब्रजस्योपशल्ये
कल्ये क्रीडावनविहरणोत्कण्ठया गच्छतो मे ।
यत्रोदञ्चत् कलवलयितैर्वेणुगीतै मृगाणां
तूर्णं राजी रजनिविरहव्याकुलानामहारि ॥२२॥

टीका—व्रजस्योपशल्ये मघेरा इति प्रसिद्धं मृगहरं तं ग्रामं व्रज, यत्र मृगहरे कल्ये प्रातःकाले वनविहरणोत्कण्ठया गच्छतो मम उदञ्चत् कलवलयितैः उत्तममधुरशब्दयुक्तैर्वेणुगीतैः कर्त्तृभिः रजन्यां विरहव्याकुलानां मृगाणां श्रेणी अहारि ॥२२॥

अनु०—व्रज के सीमाप्रान्त में लताओं से मनोहर तथा मृगों को प्रसन्न करने वाले 'मघेरा' नाम से प्रसिद्ध (मृगहर) उस प्रदेश में जाना। जहाँ प्रातःकाल के समय क्रीडावन में विहार के लिए उत्कण्ठित होकर मैं मधुररव से युक्त वंशी के संगीत से रात्रि में मेरे विरह से व्याकुल मृगों के समूह को आकृष्ट करता था ॥२२॥

००००

आनम्राणां हसितमुकुलैः फुल्लगण्डस्थलानां
दूराद् दृष्टिं स्फुटसुमनसां स्यन्दने मुञ्चतीनाम् ।
ते वैदग्धीपरिमलकिरो यत्र सीमन्तिनीनां
सस्रुर्बाणावलिविलसिता रुद्धलज्जाः कटाक्षाः ॥२३॥

टीका यत्र मृगहरे सीमन्तिनीनां ते कटाक्षरूपबाणाः लज्जया रुद्धा अपि सस्रुः, मदभिमुखं जग्मुः । कथं भूताः बाणावलेरिव विलसितं विलासो

येषां, पुनश्च वैदग्धीरूपपरिमलकिरः, एतेन तेषां पुष्पमयबाणत्वमारो-पितम् । कीदृशीनां लज्जया ईषन्नम्राणां, पुनश्च हास्य-रूपमुकुलैः सह फुल्लगण्डस्थलं यासाम् ॥२३॥

अनु०—जहाँ यौवनभार से ईषद् नम्र, मन्द मुस्कान से विकसित गण्डस्थल वाली, सुव्यक्त सुन्दर मन वाली, दूर से ही रथ पर दृष्टि डालने वाली ब्रजरमणियों की विलासरूपी सुगंधि को वि-कीर्ण करने वाली, लक्ष पर निविष्ट बाणावलि जैसी प्रखर अपांग भंगिमाएँ मुझ पर बरस पड़ी थीं ॥२३॥

००००

एष श्रीमान् प्रवसति रथी माधवो राधिकायाः
प्रेमस्थूलङ्करणकुटिलालोकभङ्गी-विलासः ।
इत्यौत्सुक्याद्वरयुवतिभिः स्मारितोद्दामनर्मा
घर्माम्भोभिर्व्रततनुरहं यत्र चित्रायितोऽस्मि ॥२४॥

टीका—औत्सुक्यात् एष श्रीमानित्याद्युक्तवतीभिर्वरयुवतिभिः स्मारितं राधिकाविषयकोद्दामनर्म्म यं तथाभूतोऽहं चित्रायितोऽस्मि ॥२४॥

अनु०—'अपनी कुटिल दृष्टि भंगिमा के विलास से राधा के प्रेम को बढ़ाने वाले ये श्रीमान् माधव रथ पर आसीन होकर मथुरा जा रहे हैं" इस प्रकार उत्कण्ठा से ब्रज की श्रेष्ठ-युवतियां के द्वारा अपनी मनोहर लीलाओं तथा राधिका के मनोहर स्म-रण कराया जाता हुआ मैं जहाँ पसीने की बूँदों से युक्त होकर चित्र लिखित सा बन गया था ॥२४॥

००००

लीलास्वप्नो मम विजयते यत्र नागेन्द्रभोगे
श्रीराधाङ्कीकृतपदयुगाम्भोजसंवाहनस्य ।

तत्र क्षीराम्बुधिपरिमलस्पर्द्धने बद्धहस्ते
ग्रामे कामं ध्वजवति भजे बद्धविश्रामसौख्यम् ॥२५॥

टीका—वडोथा इति प्रसिद्धे बद्धहस्ते ध्वजयुक्ते ग्रामे त्वमध्वविश्रामसौख्यं भजेः। यत्र ग्रामे नागेन्द्रस्यानन्तस्य शरीरे मम लीलया स्वप्नः शयनं विजयते, कथंभूते क्षीरसमुद्रस्य परिमलेन सह स्पर्द्धने स्पर्द्धां कुर्व्वति, अत्र कर्त्तरि यु प्रत्ययः ॥२५॥

अनु०—जहाँ नागेन्द्रभोग (शेषशय्या) पर श्रीराधा के द्वारा संवाहित चरण-कमलों वाले मेरा निद्राविहार उत्कर्ष रूप से विद्यमान है। क्षीरसागर की सुगन्धि को प्रतिस्पर्द्धा करने वाले उस प्रसिद्ध ग्राम (वडोथा) में निश्चय ही मैंने सम्पूर्ण सुखों का उपभोग किया था और वहीं पर माता यशोदा ने मेरे हाथों को बाँधा था ॥२५॥

००००

सोऽयं दध्नां मथननिनदाक्रान्तदिक्चक्रबालो
घोषस्तोषं तव जनयिता योजनद्वन्द्वचुम्बी।
दिव्येनालं निखिलजगतीं सर्पिषा तर्पयन्ती
भ्रातर्भूम्ना विलसति विधेर्गोमयी यत्र सृष्टिः ॥२६॥

टीका—योजनद्वन्द्वेन योजनद्वयेन युक्तः सोऽयं घोषस्तव तोषं जनयिता। चक्रवालं मण्डलं समूह इत्यर्थः। यत्र घोषे भूम्ना गवां बाहुल्येन विधातुर्गोमयी सृष्टिर्विलसति। अतएव सा सृष्टिः दिव्येन सर्पिषा घृतेनाखिलजगतीं तर्पयन्ती ॥२६॥

अनु०—दही मथने से उठकर समस्त दिशाओं को पूरित करने वाला तथा आठ कोस तक फैल जाने वाला वह शब्द तुम्हें आनन्द प्रदान करेगा। हे भाई! शपथ लेना व्यर्थ है। वहाँ पर

घृतों से समस्त जगत को तृप्त करती हुई विधाता की प्रचुर गो-सृष्टि विलास कर रही है ।।२६।।

००००

कक्षां लक्षावधिभिरभितः कासरीभिः परीतां
तां सन्नद्धव्रजविजयिनीं शाल्मलाख्यां भजेथाः ।
वीथ्यां वीथ्यां पृथुकनिकरा यत्र मित्रानुवेलं
खेलन्तस्तानुविदधते विक्रमान् मे क्रमेण ।।२७।।

टीका—सन्नन्दस्य व्रजविजयिनीं साहार इति प्रसिद्धां शाल्मलाख्यां शिशनो इति ख्यातां कक्षां प्रदेशं त्वं भजेथाः, कथंभूतं कासरीभिर्महिषीभिः परीतां व्याप्ताम्, हे मित्र पृथुकनिकरा बालकसमूहाः अनुवेलं निरन्तरं खेलन्तः मम विक्रमान् गोवर्द्धनोद्धरणादि-विहारान् अनुविदधते अनुकरणं कुर्वन्ति ।।२७।।

अनु०—हे मित्र ! चारों ओर अनेक महिषियों से परिव्याप्त तथा हर्षयुक्त गोकुलवासियों के विजय साधक उस शाल्मल (साहार) नामक विभाग का तुम अवलोकन करना जहाँ प्रत्येक गली में क्रीडा करते हुए बालकों के समूह हर समय मेरे उन विक्रमशाली गोवर्द्धन धारणादि कर्मों का अनुकरण कर रहे होंगे ।।२७।।

००००

दूरादेष प्रणयति पुरा लब्धसाहारनामा
प्रेमानन्दं तव नयनयोरौपनन्दो निवासः ।
जङ्घालेन क्षितिपतिपुरीं स्यन्दनेनानुविन्दन्
यत्राहारं प्रियमकरवं हारि हैयङ्गवीनम् ।।२८।।

टीका—उपनन्दस्य निवासः साहार नामा ग्रामः तव नयनयोरानन्दं

प्रयास्यति, वर्त्तमानसामीप्ये वर्त्तमानप्रयोगः । जंघालेन वेगवत्तरेण अतिशयवेगयुक्तेन स्यन्दनेन मधुपुरीं विन्दन् हैयङ्गवीनं आहारम-करवम् ॥२८॥

अनु०—दूर से ही महाराज उपनन्द का वह साहार नामक निवास तुम्हारे नेत्रों को प्रेमानन्द से आप्लावित कर देगा। जहाँ वेगवा-न रथ में बैठ कर मथुरानगरी को आते समय मैंने मनोहर म-क्खन का आहार किया था ॥२८॥

०००००

गोपेन्द्रस्य व्रज परिसरे लब्धतृप्तिर्भेथाः
तां विख्यातां कलितमहिलाचारुहेलां रहेलाम् ।
यामासाद्य प्रहितमुरलीकाकलीदूतिकोऽहं
सायं गोपीकुलमकरवं साचि नेपथ्यनद्धम् ॥२९॥

टीका—रहेरा इति प्रसिद्धां रहेलां त्वं लब्धभक्तिः सन् लभेथाः, कथम्भूतां महिलाभिर्व्रजसुन्दरीभिः कलिता कृता चारुहेला शृङ्गारजन्य-क्रिया यत्र, सायंकाले मुरलीशब्देन साचि नेपथ्येन अर्द्धवेशेन नद्धं अर्थात्युक्तं गोपीकुलमहमकरवम् ॥२९॥

अनु०—व्रज के परिसर में प्रसन्नता का अनुभव करके तुम गो-पियों के मनोज्ञ शृंगार सम्बन्धी विलास वाले उस प्रसिद्ध स्थान (रहेरा) पर जाना, जहाँ पहुँच कर संध्या के समय मैं अपने मुरली वादन रूपी दूती का उपयोग करता था और उसको सुन कर स-मस्त गोपियाँ अर्ध सुसज्जित हुई ही दौड़ पड़ती थीं ॥२९॥

००००

यत्र प्रीतानहमकरवं मित्रभावेन शावान्
हारं हारं विदितसमयो बल्लवीनां दधीनि ।

शाखिव्रातः स खलु वलितः प्रीतशावाभिधस्ते
देशः क्लेशं पथिषु रथिनो दारयिष्यत्युदारम् ॥३०॥

टीका—पिसाईति प्रसिद्धः प्रीतशावाभिधो ग्रामः तव उदारं क्लेशं दारयिष्यति। यत्र ग्रामे विदितदधिचौर्य्यसमयोऽहं गोपीनां दधीनि हारं हृत्वा शावान् प्रीतान् अकरवम् ॥३०॥

अनु०-दधिमन्थन के समयसे परिचित हुआ जहाँ मैं गोपियोंके दही का बार बार हरण करके बालकों को मित्र भाव से प्रसन्न करता था। प्रफुल्लित वृक्षसमूह से युक्त वह प्रीतशाव(पीसाई)नामक स्थान निश्चय ही मार्ग में रथ पर गमनकारी तुम्हारे महान क्लेश को हार नष्ट कर देगा ॥३०॥

००००

सोऽयं रम्भानटनचटुलैः सेव्यमानो मरुद्भिः
कम्राशोकोत्तमसुमनसां निर्भरामोदधारी।
पीयूषेण स्फुरितवसतिस्त्वामुदञ्चद्गुरुश्रीः
लोकातीतः किल मदयिता वल्लवेन्द्रस्य लोकः ॥३१॥

टीका—वल्लवेन्द्रस्य लोको नन्दीश्वरस्त्वां मदयिता हर्षयुक्तं करिष्यतीत्यर्थः। रम्भानटनेति वायोर्मान्द्यमानीतम्। कम्रः कमनीयो योऽशोकः, पीयूषेण स्फुरित इव वसति र्यस्य तथाभूतो लोक इत्यर्थः ॥३१॥

अनु०—कदलीवृक्षों को नचाने में चंचल वायुओं द्वारा सेवित, अशोक के कमनीय पुष्पों की सौरभ से सुवासित, अमृतमयी बस्तियों वाला, अत्यन्त बढ़ी चढ़ी शोभा वाला महाराज नन्द का वह अलौकिक नगर तुम्हें अवश्य ही हर्षित करेगा ॥३१॥

००००